No. १३८६

Title भवानन्दी प्रकाशे उपाधिवादः

Author महादेव पण्डितः

Extent ११९ Age x

Subject न्याय वैशेषिक

११९ पत्रे

मकरन्दी प्रकाशे उपाधिवादः

१३८६

श्रीसिद्ध्यै गौरीविजयते ॥ नत्वा शिवं शिवासूनुं महादेवेन धीमता उपाधौ क्रियते व्याख्या व्याप्तिमवानंदं गिरां स्फु-
ट स्फूर्त्ति अनेन प्रकारेणास्यार्थः योजनतायां पुयोद्धनत्वाभावमिति प्रकृतान्यथायोजनायां नतु मूलेऽयथा-
श्रुतयोजनयैव व्याप्तिनिश्चयप्रतिबंधकव्यभिचारज्ञानसंपादकज्ञानविषयत्वस्योपाधौ लाभेऽप्रतियो-
गिज्ञानविषयास्वज्ञानजन्यत्वाभावज्ञानप्रयोज्यव्यभिचारज्ञानाभावसंपादनद्वारा व्याप्तिनिश्चयप्रयोज- 1
कत्वस्यार्थतो लाभेन व्याप्तिनिश्चयप्रयोजकत्वरूपोपयोगस्य न लाभ इति श्रारणामन्यथायोजनानुसरणफ-
लमिति चेन्न यथासन्निवेशपदैरपि व्यभिचारव्याप्यत्वग्रहेतोर्दृशज्ञानविषयत्वसंभवेन निरूपणीयमताप-
त्तानव्याप्तेरुपयोगस्य लाभायान्यथायोजनानुसरणस्य फलत्वात् एतेन व्याप्तिनिरूपणायां तदं व्याप्ति-
पैकसंबंधित्वज्ञानात्व निश्चयप्रतिबंधकव्यभिचारज्ञानसंपादकज्ञानविषयत्वेन रूपत स्योपाधेस्त्र ल्ला-
न हेतुत्वेऽपि ज्ञानहेतावच्छेदक तादृशज्ञानविषयत्वरूपग्रसंगेन यथा स्फुटयोजना कृत्स्नेनोपाधिनिरूपणा-
संभवेः अन्यथायोजनारूपं येरोपोह्या नानुसरणीमित्याशामपेलामपि निःशंकापि निरस्ता न यासत्तु न्ते रो स्या

म०अ०

घटादेरपि निरूपणीयत्वापत्तेः । न चान्यथायोजनायामपि कथं घटादिव्याप्यत्वेनोपाधेर्ज्ञानलाभः व्यभिचारोपाधि
व्याप्यत्वग्रहे व्यभिचारज्ञाने सति उपाधिज्ञानस्येव व्यभिचारे घटादिव्याप्यत्वग्रहे व्यभिचारज्ञाने सति घटादिज्ञा
नस्यापि संभवादिति वाच्यं । अन्यथायोजनायां व्याप्यत्वेन व्यभिचारज्ञानस्य व्याप्यज्ञानविधया व्यापकाभिमतो 2
पाधिज्ञानजनकत्वलाभेऽपि वस्तुगत्योपाधौ व्यभिचारव्यापकताया लाभेऽप्युपाध्यभावस्य व्यापकाभावविधया व्या
प्तिनिश्चयविघटकव्यभिचाराभावरूपव्याप्तिसंपादकत्वलाभेऽप्युपाधेरवश्यज्ञानजन्यत्वस्याभावज्ञानेन व्यापकाभा
वे संपत्तिद्वारा व्याप्यव्यभिचाराभावरूपव्याप्तिनिश्चयप्रयोजकत्वस्यार्थतो लाभेऽप्येतादृशप्रयोग्यत्वस्याव्याप्ति
निश्चयप्रयोजकत्वरूपस्य घटादिव्याप्यत्वेनोपाधेर्ज्ञानस्य लाभसंभवात् । न चोक्तरीत्या साध्यादिव्याप्यत्वग्रहे
नैवोपाधिनिरूपणासंभवेऽपि आग्रन्थानस्यापि सांगत्वं योज्यमिति वाच्यं । अन्यथायोजनाया आवश्यकत्वे
नतंगस्योपाध्यज्ञानस्यैव संगतित्वसंभवे वहिरंगस्य संगायपरित्यागस्यैवोचितत्वादित्यभिसन्धानमर्दः । आशास्तिकं पोरा रम०

वं न दोषायेत्यत आह नव्यास्त्विति असंगतत्वादिति उपाधिज्ञानस्य व्याप्तिनिश्चयप्रतिबंधकत्वादि
तिभावः उपोद्घातस्य निश्चयसंभवतो योद्घातस्य ननु पक्षाभावेन प्रयोजनतया व्याप्तिनिश्चयप्रतिबंधकत्वमभिवा
त्वात् संपादकताऽविषयत्वरूपप्रसंगस्य चलाभिनतस्याकरोत्साधयादिसाधारण्ये २५ नयानस्यापि निरूप
णीयतायत्तिरत आह नन्वित्येषेत्यादि केचित्तु उपाधिसंदेहे न सर्वत्र व्यभिचारसंदेहसंभवेन व्याप्तिनिश्च 3
याऽप्रयोजकत्वशंकाकारणाभावादनुमानप्रमाणाभिमुखं न चार्वाकं प्रति काशिकत्वकारणाधीनस्योपा
धिज्ञानस्य तदधीनव्यभिचारज्ञानस्य चासार्वत्रिकत्वात् तदभावदशायां व्याप्तिनिश्चयो न दुर्घट इत्यस्तु नरि
नं तत्र सर्वेषूपाधिनिरूपणं विमापि निवेहतोति पक्षाश्रनम् लक्षणस्य सिद्धोपोद्घातसंगतिमेवं संभवतीत्या
त्पक्षाप्योजनयाभिप्रायाकेऽपोद्घातसंगतिरपि कल्पनागौरवादिदोषग्रस्तत्वालोच्य दीधितिकारेणासंग
तिपरतयोपाधिज्ञानादिस्याद्विमूले व्याख्यातं प्रतिबंधकत्वदीधितौ निरूपयिष्यते निरूपणकं तेषाल थानिरू

परोक्षद्धिधीर्यातार्थस्यापाधकमकिलस्यान्वयः । आहसप्तमंगानुकूलं पूर्वनिरूपितव्याप्तेः स्वनिष्ठपाभाव
प्रयोजकीभूतव्यभिचारज्ञानकारणज्ञानविषयत्वरूपं संबंधमुपाधावाह स एवः सोपाधौ सिद्धिकर्मत्वसिद्धि
करणत्वरूपसाध्यत्वसाधनत्वयोर्नोसंभव इत्यत आह व्याख्यायां साध्यत्वेनेति व्यापकत्वेनेति आत्मच्छत्वाध्याप्य 4
त्वस्य पूर्वनिपातः उक्तरूपसाध्यत्वसाधनत्वयोर्विवक्षितविवेकेन व्याप्यत्वव्यापकत्वयोः पर्यवसानादिति भा
वः अभिमानस्यान्यस्य विशेषणत्वादिति उपलक्षणावच्छेदकरूपान्तानाद्युक्तरणस्य हेयत्वाय सोपलक्ष
णत्वासंभवादिति भावः सर्व अभियमेनाभिमानकल्पनान्वदोष इत्यत आह साध्याभावच्छेदकालेनाभिति
आवश्यकत्वरहितेत्यन्य यामर्वस्य विषयत्वे किंचिदभिमानविषयत्वेनाभिमनं तस्या व्यावर्तकत्वायेत्यर्थ इति
भावः दीधितौ स्वसमनियतनिन्दवच्छिन्नेति निरूपितस्वसनियतत्ववच्छिन्नेति ष्टस्य व्यभिचारस्योन्नायकत्वस्यार्थः एक
स्यैव रूपद्वयस्य प्रकारसंबंधोभयपरत्वमिस्याशयेनाह व्याख्यायां एकप्रकारेणेति न चान्याभेदस्य नतो राम०

पार्थत्वे एकसंबंधेनेत्यत्रान्वयः अवच्छिन्नत्वस्य तन्नोपार्थत्वे च एकप्रकारेणोत्पन्नानन्वयइत्यतिवाच्यं भे
देभेदस्य साधारणोपादानत्वस्य तन्नोपार्थत्वेनोभयापाद्यायोपपत्तेः अभिमानघटितेयथाकृतलक्षणसाधार
ण्यापाद्यधूमवान्वह्नेरित्यत्र वह्निदेशनिष्ठसंभवादित्यर्थः व्यभिचारित्वाव्याप्यत्वसंबंधावच्छिन्नप्रतियोगि
ताकोपाधिव्यापकाभावरूपानौपाधिकत्वं विहाययावद्व्याधिव्यापकव्यापकत्वरूपानौपाधिकत्वपरिग्र 5
हेणान्योन्याश्रयोपपादनेबीजमाह धूमवान्वह्नेरित्यादिनसामग्रीरूपोपाध्यभावज्ञानं निरूढोपाध्यभा
वरूपानौपाधिकत्वज्ञानं यावद्व्याधिव्यापकेत्यादिग्रन्थानौपाधिकत्वशरीरेसाध्यव्यापकत्वस्यैव निवेशे
दीधितौ व्याख्यायां च उपाधिव्यापकत्वनिवेशः प्रत्युताप्रिमाद्येराउपाधेः साध्यनिष्ठव्याप्तिनिरूपत्वेके सा
धनस्योपाधिव्याप्यत्वपर्यवसन्नेउपाधेरेवसाध्यत्वादित्यत्वेयथावत्स्वव्यभिचारीसाधनौपाधिकत्वं नरूपाि
ताणवीजमाह यावत्स्वव्यभिचारीत्यादिनाउकरूपेत्यावत्स्वव्यभिचारीत्यादिरूपेत्यर्थः अन्योन्याश्र

यमुपयम्यादृश्यमिधमन्निहितादिनानत्रापि यावद्दोर्दृधनेत्साधकारकज्ञानेऽपितन्निरूपकत्वेतिश्चाद्वैधनति
हृन्निरूपकत्वेत्यर्थः तद्व्याप्तीति श्चार्दृधनव्याप्तीत्यर्थः एवमग्रेऽपि तद्व्याप्तिनिरूपकत्वं धूमनिष्ठव्याप्तिनिरूपकत्वं
नात्साध्यपदेति यद्यपि श्चान्योन्याश्रये चक्रके वा साध्याप्रयोज्यत्वेन व्याप्तिरूपकस्य व्यवधाने श्चान्योन्याश्रयःध्व 6
योर्व्यवधाने चक्रकं व्यवधानाभावे श्चात्माश्रय इति विवक्षणे राडुद्दरस्याशयेनेदं मन्तान्तर्मिति। एतन्मते
व्यभिचारिसाध्यत्वसंबंधावच्छिन्नप्रतियोगिकोपाधिव्यापकाभावत्वमेवान्योपाधिकत्वं यत्रेति तथा
चैतन्मते प्रकृतेऽसवेमेव व्यापकत्वं व्याप्तिनिरूपकत्वस्वरूपमिति भावः उपाधिव्यापकेस्य तु उपाधिव्यापकाभा
वरूपान्योपाधिकत्वशरीरान्तर्गतोपाधिव्यापकत्वे असंभवादिति व्याप्तेरप्रवेशादिति भावः उपाधिव्यापकेसा
ध्येयावदुपाधिव्यापकव्यापकव्यापकत्वरूपान्योपाधिकत्वशरीरान्तर्गतोपाधिव्यापकत्वे अन्याहृशेतिन
धत्रिहेत्यादिरूपेत्यर्थः अपरिहारादिति व्याप्तिनिरूपकत्वरूपस्यान्योपव्यापकत्वस्याप्रवेशादिति भावः एग०

अत एव स्वमते यत्र तेन सर्वस्य व्यापकत्वस्य व्याप्तिनिरूपकत्वस्वरूपत्वाभावादेव अपदार्थेति अनव
स्थायामन्योन्याश्रयपदार्थत्वाभावादिति भावः। केचित्तु अव्याप्यवृत्तीनां व्यापकत्वमिति स्वसत्वादि
त्वाद्यसंबद्धेनो संयोगादीनां साध्यव्यापकत्वं हृद्यगुणानामेवाभिधेयत्वादिसाध्यसंबद्धेनो संयोगादीनां संयो
गाभाववादेनासाधनव्यापकत्वे चेत्यर्थः। उपपादयितुमिति उपपादनफलं वा संबद्धेनेत्यासुपाधित्वं संपा
दनं नूनं संबद्धेनो वा नुपाधित्वसंपादनमिति भावः। आह अव्याप्यवृत्तिव्यावृत्तं प्रतियोगित्वमाह व्याख्यायां
न ह्यधिकरणावृत्तित्वमिति वृत्तित्वे उपाधिनाघटकसंबंधेनेत्यस्यान्वयः संबंधभेदेऽप्युपाधिनाघटकसंबंधा
ससंबंधत्वव्यासेधे इति आदेर्धिनादेरपि वृत्त्यादिसमानाधिकरणादेर्धनाभाववधधिकरणोकालादेःका
लिकादिसंबंधेन वृत्तित्वयासाधनाव्यापकत्वासंभवादिति भाव। अत्र नन्वं द्रव्यत्वादिसाध्ये गगनान्य
त्वादेर्द्रव्यत्वादिसमानाधिकरणगगना॰ नान्यत्वाभावाधधिकरणगगनादेः संबंधसामान्येनैवावृत्ति

भ॰प्र॰ तथासाधनव्यापकत्वसंभवेनासंभवासंभवात् द्रव्यत्वेऽपि स्मुक्तं द्रव्यत्वाद्यभावेति न च संयोगाभावाधिकर
णगुणावृत्तित्वस्य संयोगसत्त्वादेव संयोगस्याधा॰स॰नाव्यापकत्वसंभवे द्रव्यत्वाद्यभावपर्यंतानुधावन
मफलमिति वाच्यं द्रव्यगुणान्यतरसंयोगाभावाधिकरणगुणावृत्तित्वस्य संयोगसत्वेन साधनाव्यापक
त्वस्य तदधिकरणावृत्तित्वसामान्याभावस्यैव निवेशेनोयत्र वा संयोगाभावाधिकरणद्रव्यवृत्तित्ववत्ति संयो १
गे संयोगाभावसमानाधिकरणसाधनाव्यापकत्वासंभवात् न चैवं समानाधिकरणसंयोगाभावाधिकरणद्रव्य
वृत्तित्ववति संयोगे तत्समानाधिकरणाभावाधिकरणवृत्तित्वसामान्याभावाघटितस्य स्वरूपे वनिवेश्य इति वाच्यं व्यतिरे
किमात्रसाध्यकत्वाद्यभावाधिकरणवृत्तित्वे नासंभवापत्त्या साधनसमानाधिकरणधर्मेणापि किंचिद
भावाधिकरणावृत्तित्वसामान्याभावस्यैव निवेशेनादोषात् ननूपाधिनाघटकसंबंधेन तदधिकरणावृ
त्तित्वमुपाधिनाघटकसंबंधेन तदधिकरणत्वयोगिकत्वयस्मिन्योगिकत्वाभावाभावरूपं वा चेन्न या च जाति रण

मानमेयत्वादित्यादावुक्तरीत्यासमानाधिकरणाव्याप्तिरतआह एवमितिविशिष्टसत्वस्यगुरुतया कथमन्यत्वविशि
ष्टसत्वस्यगुरुत्वादेर्निरवच्छिन्नसमानाधिकरणाभावप्रतियोगित्वसम्भवेपिसाध्यव्यापकत्वशरीरेतस्यानस्वरू
पत्वेबाधकाभावदितिवाच्यं तथासतिदूष्यांशसत्वादित्यादौहेत्वघटकत्वस्यविशिष्टदूष्यतावच्छेदकत्वापत्तेः
तादृशद्रूप्यत्वाद्यभाववानित्यादौविशिष्टस्यानतिरेकेणतादृशद्रूपत्वादेरपिनैनसाध्यसमानाधिक १
रणाभावाप्रतियोगित्वात्तत्समानाधिकरणशुद्धद्रव्यत्वाद्यभावाधिकरणवृत्तित्वेनसाध्यव्याप
कत्वस्यापिसत्वात्प्रतियोगित्वविशेषणं स्वरूपसंबंधरूपप्रतियोगित्वविशेषणंतदधिकरणाधि
करणाधिकरणत्वस्यतदधिकरणवृत्तित्वसामान्याभावानाधिकरणपक्षसत्वेऽपिदोषनिरासासंभवादाह
तदधिकारणेत्यादिनातदधिकरणवृत्तित्वसामान्याभावानाधिकरणत्वस्यार्थः यदधिकरणत्वमितिस
मानाधिकरणांताननुसारानुमानत्वबोधकपदाभावात् यत्रस्वाभावसमानाधिकरणप्रतियोगित्वस्वस्व

भप्र०

रूपत्वेनाविरोधित्वाभावादाह विरोधित्वं चेति अभावाधिकरणयत्किंचिदधिकरणवृत्त्यनेन प्रतियोगित्वस्या
नस्य विरोधित्वादाह यादृशप्रतियोगितावच्छेदकेति न च तदभाववत्ताज्ञानस्यैव तदधिकरणत्वग्रहप्र
तिबंधकतया प्रतियोगितावच्छेदकस्य कथं तत्प्रतिबंधकत्वमिति वाच्यं तद्धर्मावच्छिन्नवत्ताग्रहे तद्धर्माव
च्छिन्नप्रतियोगिताकाभाववत्ताज्ञानस्य प्रतिबंधकतया तस्यैव प्रतियोगितावच्छेदकत्वात्तादृश एवं चे
यादृशप्रतियोगिताकाभाववत्ताज्ञानस्य निरूपितप्रतिबंधकतानवच्छेदकत्वमिति पर्यवसितमिति निष्कर्षः यदधि
करणे अभावाधिकरणप्रतियोग्यनधिकरणत्वेति स्वावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणत्वे सत्य-
त्वं यादृशप्रतियोगिता तेन सत्त्वप्रतियोगित्वेनाभावाधिकरणे रूपाभावे रूपप्रतियोग्यनधिकरण
त्वग्रहेऽपि न दोषः फलितार्थमिति अत्र संयोगप्रतियोगिताकाभाववत्ताज्ञानस्य गुणादौ संयोगाधिकरण
त्वग्रहप्रतिबंधकतया द्रव्यत्वावच्छिन्नप्रतिबंधकतया ध्वंसत्वात्तद्द्वये गुणादिसाधारणसंयोगताव्याप्य ए०प्र०

ति व्याप्तौ एव मास्य स्यात्. दोषनिरासोप्यूह्यः। अत्र सामानाधिकरण्यविशेष्यकस्यावच्छेदकावच्छिन्नप्रतियो
ग्याधिकरणत्वस्य हेतुमत्संबंधकतानिरूपितविषयितासंबंधावच्छिन्नावच्छेदकताप्रयोगात् तत्प्रतियोगित्वमि
ति निष्कर्षः। न च नित्यत्वप्रतियोगितावच्छेदकविशिष्टैककार्यत्वलानुपपत्तिरिति ध्येयं। इदं तु बोध्यं अत्र साध्यस
मानाधिकरणाभावेऽपदहेतुकरणाधिकरणत्वं साधनसमानाधिकरणपात्रिकं चेदभावे च पदविकरणाधिक
रणत्वाभावस्य लघुपाधित्वेऽपि साध्याभावे च प्रतियोगितावच्छेदकत्वादिमलसामान्यं स्यादेव धिसिकारस्य विरोधिता
दिघटितत्वहरणाकरणमसमसंत्मसमेवेति प्रतियोगितावच्छेदकसंबंधेनैसाद्विनचनिस्तत्वानुगमत्ववान्ते
यत्वादिसत्त्वे विषयितासंबंधेन घटादिपदाभावव्याप्तिः। विषयितासंबंधस्य वृत्तिनियामकतया प्रतियोगि
वच्छेदकत्वाभावेन विषयितासंबंधावच्छिन्नताप्रसिद्धेरिति ध्येयं प्रकारतादौ तत्प्रसिद्धेः सा चाविष
यितादिवृत्त्यनियामकसंबंधस्य व्याप्यभावप्रतियोगितावच्छेदकत्वानिविशेषणतया घटत्वस्यादेरेव

६

सि॰ म॰ 6

पाधित्वसंभवेन विषयितया व्यापकतावच्छेदकत्वेन संबंधेन घटादेः साध्यत्वांगीकाराद्द्वयमनूपाधि
साधकसंबंधसामान्येनाप्यादस्थणप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वस्याव्याधिकरणायत्त्विवि
वक्षणानुयोगिकत्वेन घटाभावस्यादृश्यप्रतियोगित्वमेव प्रतियोगितानायोगित्कर्षः। तेन कालपरिमाणावा
नद्रव्यत्वादिसाध्यको कालिकसंबंधेन घटाद्युपाधिनासंग्रहः। कालिकसंबंधेनावच्छिन्नगगनादेरादेश्यप्रतियोगि 12
त्वप्रसिद्धेरिति मच्छिसंत्वरूपं संबंधेन गगनादेर्हतिमत्त्वेऽनित्यत्वात् पक्षपदकृत्यमिति तथा च यदः पदस्य सोवि
षुत्वादिसत्त्वपक्षधर्मावच्छिन्नसाध्यतावच्छिन्नमसत्त्वस्य व्यापकमनुत्वरूपवत्त्वं विषुत्वावच्छिन्नप सत्त्व
व्यापकमात्मत्वं चासंकीर्णोमुपाधिद्वयमिति भावः। सर्वनाम कार्येऽस्मिन्नादेशः। भावप्रधानः इति निष्प
न्नबहुव्रीहिसमासमिति प्पन्नपक्षेतापदं पक्षेमत्त्वपरं न तु समस्य मामेनरपदमिति मत्वपरं अनन्वयापत्तेः
तथा च पक्षपदस्यतात्पर्यग्राहकत्वात् पाठनरशाब्दस्यपक्षमिष्ठमेदप्रतियोगित्वेनत्वहंपोतिभावः भावप्र धान॰

धानन्निर्देशादेवेतिनयाचपंचमीतत्पुरुषसमासनिष्पन्नत्वपक्षेतत्पदस्यपक्षेनत्वपरतयापत्नुपदस्यता
त्पर्यग्राहकत्वेनभेदत्वच्छेदकेतत्पदस्यपक्षेभेदेत्वस्तुगोणिनिमित्तमनत्मेवसमीचीनमितिभावः सर्वनामकार्या
भावइतिअर्थान्तरसंक्रमितसत्त्वादिः सर्वनामत्त्ववारणायशक्यार्थस्थापनस्यवस्तुर्वनामसंयोगकार
दितिभावः असंभवं ईदृशार्थान्तरोपस्थापकत्वेपिस्वार्थान्तरोक्तार्थोपस्थापनेपि अपिनाशक्यस्वार्थो
पस्थापनसमुच्चयः संभवादितिअनन्यथात्वाच्छेदेनत्वामिमात्रशक्यतावच्छेदककत्वादेःपदेपस्यादि 13
परेसर्वनामत्वानुपपत्तेरितिभावः तथात्वेपिसर्वनामकार्यसंभवेपिनिषेधानुशासनेमिन्नबहुव्रीहावितिस्व
नुशासनेनसर्थः नचैवंशनिप्रयोगत्वार्थोपस्थापनेसर्वनामसंयोगकारेः निसर्वापिसादावुपसर्जनीभूतसर्वा
देरपिसर्वनामत्वंस्वरिष्टमितिवाच्यं नबहुव्रीहाविसन्नबहुव्रीहिशब्दस्यापत्ततुगापपासमासादिपरस्य
पसर्जनीभूतस्यचादेःसर्वनामत्वनिषेधोनुशासनेनासिद्धस्तस्याशयात् इतिप्रोपहितमितरथमेसादिनयायेन

रंकरोतीत्यर्थः। शङ्कते तत्त्वज्ञयांतं सद्धेत्वंतरमिवेदं मितिसमवायादिगगनं तु गगनत्वस्येव नसवृत्ति
मत्वमिति भावः॥ व्याख्यायायासंज्ञानिरुक्तस्यावच्छिन्नात्वविधर्मान्यत्वस्याप्रत्यक्षत्वप्रयोगाधिकरणसंबंधावच्छिन्न
प्रतियोगिताको यावदभावानामभकत्वं पर्याप्तिः स्यादिति यावदन्तिताज्ञानसंबंधिनो योग्यावादितावानामेक
तानात्वस्यापायानादिति भावः॥ ननु व्याप्यकाभावस्येवाभावकत्वयावदभावप्रधानतानिदेशे व्यापकत्वेपि पर्वतीयता
न्यत्वस्यानिरूपकोऽपायाध्यभावानामसकत्वम्यापकञ्चिदिति सनवदभिमतमूलांसंगानिरिसाशये नाहभावप्रधाने
ति आवश्यकत्वेऽस्य यावसर्वनामकायीवत्त्वमिति भावः। परमार्थेस्तु यत्रं भक्त्याहृदी विनावलम्बवेति
साध्यिसमेनोक्तं तत्र कृत्वेसंगमननसाधुत्वमुपपादयतिव्याख्यापांपदैनेनस्येति मन्वेनकृत्यस्तत्वप्रपाध्या
भावनिरूपणे अत्रसिद्धसाध्याविपर्ययो यथाकेवलान्वयिपक्षेतरत्वादित्यत्रिममूलत्वे यत्तु तरोधात
भावप्रधानतानिर्देशोपि मूलाभिप्रेतहतिहेतुहदिति धापाहरोधिप्रोत्त्वरयातिवित्ति इत्यं चकञ्चिदिति पर्वी 14 राम०

कमनसाधिसम्पत्तिरिति चेदेवं व्यापकाभावस्यैवेति यथा व्यापकासंनाभावस्य व्याप्याभावगमकत्वं न यथा व्याप
कत्वदर्शनाभावस्यापि व्याप्याभावाभावसमनियतत्वेन प्रतिबन्धकत्वं तु प्रयोजकत्वं व्यापिसाध्याभावव्यापकीभूता
भावप्रतियोगित्वं एवम् अनौपाधिकत्वम् अभिमतसंबन्धिनि भावे नतु लघोर्व्यापकासंनाभावत्वस्यैव व्याप्यतावच्
छेदकत्वात् गुरोर्व्यापकत्वदर्शनाभावत्वस्य व्याप्यतानवच्छेदकत्वात् व्यापकदर्शनाभावस्यैव
व्याप्याभावानुमकत्वं संभवतीति तन्न अतः व्याप्तिसत्त्वे निरुक्तेऽपि व्यापकतावच्छेदकतां गोकारादि साध्याय: स्थले 15
ऽतिव्याप्तेस्तेनैव व्यापकेनास्य स्वव्यापकगतसाध्यव्यापकत्वाभावेन व्यस्तत्वात् आभावेपि साध्यव्यापकत्वा
भावकदूषणगोपाधिकत्वग्रहणानादिव्याप्तिपरीक्षायां यत्र बहव: मात्यास्त्वकमेदं समस्तकृतं यामस्तु केसहजा
नान्तिव्याप्तिकारणयोर्विशेषणादानस्यामोचि स्यात् दोषाधीनता नातिप्रसंगस्य केनापि प्रकारेण
वारयितुमशक्यत्वाद्भोर्निरुपहितस्य साध्यव्यापकत्वे प्रमाणाभावादेव साध्यव्यापकत्वसिद्धावपस्त्वलि

व्याप्तिपरत्वाच्चेत्यर्थः । अत एव प्रागभावेनापि साध्याव्यापकत्वेऽपि व्यतिरेकत्वादिभिन्नत्वमद्यत्समानकालस
त्त्वव्याप्तिरित्यभिप्रायेणैव व्यतिरेकस्याधिक्यं ग्रन्थे योऽव्यासम्यानं । न चैवं मूले व्यक्तस्य साध्यव्यापकत्व
त्वादिनान्यान्नाति व्याप्त्युपहारशंकायां संगतिरिति वाच्यं । नन्वेवं पक्षेऽसाध्यवति व्यापकदर्शनायोगेन साध्याव्यापक
समभिव्याहारसत्त्वेन वक्तव्यत्वे ति व्याप्त्युपहारसाधकत्वादिति प्राहुः । पक्षेतरव्यतिरेकस्य च विशेषणत्वे साध्या 16
भावासाधकत्वेन व्यतिरेके साध्याभावानुमानरूपकस्य विशेषणताऽऽहार्यविशेषणादाने पक्षेतराति
व्याप्त्युपहारे व्यतिरेकस्योपाधिमूलत्वं ग्रन्थकृत्स्वाशयेनाशंकने दूषितत्वोपपादयतीति व्याप्त्यापाद्यविशेषु
णात्वं हीति । व्यभिचारावारकविशेषणघटितत्वं हि सर्वथा सार्थकविशेषणानिक्षेपप्रयोजनमिति यावत् । न च विशे
षणतावच्छेदकनानात्वाद्विशेषणघटितधर्मावच्छेदेन अधिकं विकारं । अतिव्याप्त्युपहारासंपादकं पक्षे वर्त्तमानं साध्यमेव य
र्थं व्यभिचारावारकत्वात् एवेत्यर्थः । दूषितत्वोपपादनेऽवं धापदं वा गमकत्वहेतुत्वेनान्वितं नत्र साध्यसाध्याभाव०

वानुमितिजनकज्ञानप्रतिबंधकतावच्छेदकसाध्याभावानुमानहेतुकत्वस्यैव यद्धर्मः भावेन विशेषणाभावप्रयुक्त
विशिष्टाभावसत्वात् तद्विशेषणेन न च हेत्वन्तराणि व्याप्यवृत्तय इति शंकनीयं तात्पर्यं तद्व्याख्या अनुमानेति साध्या
भावानुमानेत्यर्थः वास्तवेत्यादि वास्तवत्वं च साध्याभावानुमानहेतुकत्वपविशेषणात्मन्विच्छिन्नत्वं तत्र याचव
वत्याया व्यतिरेकेव्यभिचारिविशेषणतानामित्यत्र। अत्र साध्यत्वरूपविशेषणदानेन परसेनरप्रतियोगिव्याप्तिग्राहगारणोपरोऽव्यतिरेक 17
इत्यादिप्रलये पश्यन्ति समाधानस्यासंभवं व्यतिरेकनिरूपकविशेषणतानामुत्तरस्य व्यतिरेकप्रतियोगित्वेन सं
सत्वेनाभाव नेव नेसन आहपदव्यतिरेकत्वमितिव रूपात्याद्वित्यहेत्वादिहेतुत्वविशेषणपदवैयर्थ्याद्वावमिम
संगवारणाय न न्यूनपदघटनं न च साध्यवत्वे धनाभावत्वस्यैव धूमाभावव्याप्यतानवच्छेदकतया इदं विनष्टं वा
व्याप्तिरिति वाच्यं इंधनाभावाद्विधनाभावयोर्भिन्नतया भिन्नधर्मिकत्वेनाद्विधनाभावत्वस्यापि व्याप्य
तानवच्छेदकत्वात् अन्यसाध्याभावव्याप्यतानवच्छेदकविशेषणघटितस्याभावकं घसाध्यव्यापकं न

दन्यत्वे सत्यन्तनत्वावच्छिन्नविशिष्टेकाभ्यनुपपत्त्यानुपपत्तिः विशेष्यसाध्यव्यापकत्वस्याप्यभावभेदप्रति
योगिकोभ्येसाध्यव्यापकत्वविशेषः केचित्तु व्यतिरेक इत्यादिग्रन्थस्य केवलान्वयिसाध्यकस्थले व्यापकत्वस्य दृष्ट
कताधीनाभावादनुपाधित्वम् एतेनापि व्याप्तिवारणायेत्यन्तग्रन्थस्य भिन्नं दृष्टकतावीनाभावस्यालक्ष्यस्य निरा
पकत्वेनापि व्याप्तेरेवानुकूलत्वादित्याशयेनाशंक्य नेदीधितिलोपप्रयोगितामकत्वे साध्याभावसाधकत्वे
नयावेयष्यं दृष्टकतावीनाभावोपपादकत्वेन एवं तद्दोषापत्त्या नापि व्याप्तिप्रातिकूल्यापसमुनापि व्याप्यभावा
नुकूल्यापेवविशेषः नयावीतिनिथ्याचव्यतिरेक इत्यादिग्रन्थस्य नरोत्तमा नापि व्याप्तिवारणपरं किंतु व्यति
रेकेव्याप्यविशेषणानामन्यत्वस्यापि विशेषणादानेनापि व्याप्तिवारणपरमिति निवेदितम् नुवासत्वपदानस्याः
स्यादिदोषग्रस्तत्वात्पेस्तम्भोपमितिदिकप्रगल्भमतं व्यतिरेक इत्यादिग्रन्थस्य विशेषणादानेनापि
व्याप्तिवारणपरं किंतु वस्तुतो नापि पमवलान् साध्याव्यापकत्वोपपादेनेन सद्वारणपरमिति विवक्षः प्रगल्भस्य मते 18

ननु व्याप्यस्य वचनं पूर्वं व्यापकस्यानन्तरं पक्षमित्यादिप्राचीनोक्ताख्याख्यायामन्वयव्याप्तेः प्रथममुपस्था
पकत्वेन व्यापिकायां व्यतिरेकव्याप्तेरसत्वात्तेन कथमन्वयवैपरीत्येनोपस्थापकत्वमित्यत आह व्याप्यव्यति
रेकि तामिनिलध्यं स्यादित्यन्यथा चक्रस्य व्याहतत्व संभवान्वैयर्थ्यात् प्रतिनिरिक्तिशोध. ननु चान्वयवैपरीत्येनो
पन्यासेऽन्वयव्यतिरेकव्याप्त्योः कथं व्याप्यव्यापकभावविलक्षणत्वं तत्त्रैव धूमवत्त्वाद्धेतोः धूमव 19
द्वाद्देरवाच्यापित्यक्त्वाभसंभवात् ननु अन्वयव्याप्तेः प्रतियोगितावच्छेदकव्यतिरेकव्याप्तेश्च न स्वाति
योगिकाभावविषयत्वाद्वैयधिकरण्येन व्याप्यव्यापकभावासंभवत्वमित्यत आह हेतुतावच्छेदकरूपेणोसा
दिसाध्यावच्छिन्नसाध्यकत्वं तोयो न द्वयस्य प्रतियोगित्वप्रतीयोगन्यसमत्वं न प्रतियोगित्वं अन्वयः नन्वात्मक
र्मधारयोन्तरमत्वथीयोपस्थाप्यं तादृशाभावेति व्याप्यत्वस्य भावेऽस्यर्थः । पक्षमावच्छिन्नो निपद्धर्मः साध्य
तावच्छेदकं न संबंधेन साध्यतावच्छेदकसंबंधेनेत्यर्थः । न द्रूपेति हेतुतावच्छेदकरूपेणेत्यर्थः । प न तत्संबंधेति

10 नुनावच्छेदकसंबंधेत्यर्थः व्याप्यत्वार्थः यथोक्तव्यतिरेकस्याद्धित्वनियमार्थः अत्र साध्यवद्भिन्नप्रतियोगितांन स्यापि व्या

वृत्तिरसिद्धेहेतुरिति तु वस्तुव्याकारणीत्या व्याप्यवृत्तित्वमात्रस्यैव व्यावर्तकतया प्रयासं निवेशो वैयर्थ्याभावादेव प्रति

योगितां न निवेश इति वाच्यम् एकत्र साध्यवद्भिन्नप्रथमनस्याद्धेत्वितिमाह संयोगी सत्त्वादित्यादौ व्यभिचारवारणायेति प्रति

रेके प्रतियोगितावैयधिकरण्यनिवेशादित्याशयः कालिकादिसंबंधावच्छिन्नप्रतियोगिताकत्वादिसत्त्वे मानाभावेनाव्या 20

दित्याद्यधिकरणसंबंधपरिचयः व्याप्यवृत्त्यभावेति कालिकसंबंधावच्छिन्नप्रतियोगिताकव्यतिरेकाभावस्या

व्याप्यवृत्तित्वेऽपि तादृशाकेवलान्वय्यभावस्य व्याप्यवृत्तित्वादिति भावः ननु द्रव्यत्वाभाववत्त्वावच्छिन्नव्याप्यताति

रूपितव्यापकत्वस्य संयोगाभावे सत्त्वात् व्यभिचार इत्यत आह संयोगाभावस्येति कालिकसंबंधावच्छि

न्नप्रतियोगिताकसंयोगाभावस्याव्याप्यवृत्तित्वादाह व्यधिकरणसंबंधेनेति संयोगादिनेत्यर्थः अवच्छि

न्नप्रतियोगिताकसंसर्गीयार्थः व्याप्यवृत्तित्वात्तेनैव तयाच संयोगस्याव्याप्यवृत्तित्वे व्यधिकरणसंबंधावच्छि राम॰

न्नसंयोगाभावप्रतियोगित्वाद्व्यभिचार इति भावः न चैवं तु कपिसंयोगी एव दोषः व्यभिचारः निरुक्ताभावत्वावच्छिन्न
व्याप्यतानिवेशात्फलमाह न घटित्वादिनेति व्याप्तिघटकीभूतवृत्तित्वे न च वृत्तित्वादिधर्मावच्छिन्नप्रतियो
गिताकाभावत्वस्य विषयितासंबन्धेन साध्याधिकरणावृत्तित्वादिसंबंधावच्छिन्नप्रतियोगितावच्छिन्नप्रतियो
गिताकाभावत्वस्य परिष्कारः येन रूपेण येन संबंधेन तदनुधावनस्य हेतुसिद्ध्यर्थं तत्संगतिः वह्न्यभावव्याप्य
त्वे वह्न्यभावव्याप्यत्वज्ञाने उद्देश्यसिद्ध्यर्थं व्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनसिद्ध्यर्थं तदा तादृशव्य
तिरेकव्याप्त्यभावज्ञानाभावे व्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनासंभवादिति भावः । तद्रूपविशिष्ट
भेदस्यार्थः संबंधभेदस्य चेति । चकारो रूपभेदस्यापि समुच्चयः व्यापककोटौ व्याप्तितावच्छेदके रूपभेदसंबंधभ
दानुधावनस्यावश्यकत्वादुपसिद्धिप्रयोजनकत्वसंभवेऽपि व्यापकतावच्छेदकेन तदनुधावनस्य प्रयोजनकत्वे
संभवतीत्यतो व्यापककोटौ व्याप्यतावच्छेदकव्यापकतावच्छेदकयोरभिधानं तदनुधावनस्य प्रयोजन

नांतरमाह अन्यथेति व्यापककोटौ व्याप्यतावच्छेदकव्यापकतावच्छेदकयोः स्वरूपसं. इसंबंधभेदाननुधा
वने इत्यर्थः संबंधादिभेदेनेति आदिना दूरमात्रसमवेतत्वादिधर्मपरिग्रहः तेन रूपभेदाननुधावनप्रयोजनलाभः
व्याप्यत्वव्यापकत्वयोरिति यद्यप्येवमपि कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेयत्वाभावस्याप्रसिद्धा
राधारोपपादकद्रव्यत्वाभावव्याप्यत्वं न संभवत्येवं तथापि नाह शशप्रमेयत्वाभावस्य नाहं द्रव्यत्वाभावव्याप्य
त्वसंभवात्स्वसमानाधिकरणात्यंतसंबंधावच्छिन्नप्रतियोगिताकतद्भावस्य द्रव्यत्वाभावव्याप्यत्वसं
भवाच्च न दोषः व्याप्यवृत्तिव्यतिरेकित्वे व्याप्यवृत्तिव्यतिरेकित्वविशेषणं यदर्थमेव स्यादिति न चैवं
व्याप्यसाधनयोर्व्याप्यवृत्तिव्यतिरेकित्वविशेषणासार्थक्यादेव व्यापककोटौ व्याप्यतावच्छेदकव्या
पकतावच्छेदके चाखंडाभावघटकरूपभेदसंबंधभेदाननुधावनमिति भावः अत्राभावत्वे व्यापकता
वच्छेदकत्वानुधावने ++ अस्य हेतुरसिद्धएवमेव नस्य व्यतिरेकव्याप्तिघटकतायास्सर्वसिद्धत्वान्नसत्तद्

स्तु. तेन पाक्षाख्यानानो कि निनिष्ठेयम् अत्रोद्देश्यसिद्ध्यर्थं नञ्रूपावच्छिन्नाभावत्वावच्छिन्नव्याप्यत्व
स्यानुधावनं अन्यथे साधितोन्यदोषवारणाय च संबंधभेदस्यानुधावनमिति नियथ्याकथं चिद्व्याप्त्यनार्थ,
दे व्यापककोटौ व्याप्यतावच्छेदके व्यापकतावच्छेदके च ॥ एवं भेदनिवेशाद्व्यापकत्वलाभेन मूलनाशस्यादिति नद 23
नादेरेणोक्तौ साध्यासाधि व्यारव्याने ह. नाम निष्ठेयम वस्तु, न स्तु, न स्तु, न घटि, त्यादिने साधितानह. एवं च
द्यपरिग्रहः संबंधभेदानुधावनस्य कृतौ साध्ये व्याप्तिद्वयं वालासंभवेनान्यथे साधितं त्र घ स्वरूपयादनपरः व्या
प्यहनी साधिविशेषणाघटितनियमस्याद्देश्यतानरूपतिरितिनिद्राव: अन्यदेवदिशा एवं भेदाघनुधा
वनस्य नाहशविशेषणासार्थक्य घाटोद्देश्यासिध्यार्थं लिंदृष्टव्यं इति यथाक्रमं भवसम्य कृ एवं व्याप्ते
कव्यामौ एवं भेदादिनिवेशस्यावश्यकत्वयाऽदेश्यसिद्ध्ये घमिवते वानिवेशः नि ॥ केव्याप्यतासंबंध
भेदनिवेशघो: प्रकारांतरेणोद्देश्यसिद्धिः ॥ एवं प्रयोगस्तोऽस्मद्यस्ती निन स्वदर्शितनिमित्तिसारं ॥ विशेष

म॰प्र॰ णां साध्यसाधनयोर्विशेषणां ननु कथं न स्याते आकाशाभावाभावानभ्युपगमेनाकाशाभावस्य व्यतिरेक
12 प्रतियोगित्वाभावादेव न व्यभिचार इत्यत आह आकाशाभावस्यापीति अन्न एव वक्ष्यमाणादेव केवलान्व
यिहेतौ केवलान्वयिनिरूपणस्य प्रसंगस्यैव व्याप्यत्वस्य सत्त्वेन साध्यव्यतिरेकप्रतियोगित्वविशेषणादेव नत्र 24
न व्यभिचारदूषणाशयेनाह नावश्यैवेति यथासंनिवेश इति तथा चात्र व्याप्यवृत्तित्वस्य व्यतिरेकविशेषणा
नयैव संनिवेशेन हेतौ विशेषणानयानिवेशेन संभवतीति भावः । अत्र च सत्त्वसमानाधिकरणाभावात्प्रतियो
गित्वरूपमेव व्याप्यवृत्तित्वं व्यतिरेकविशेषणं निरवच्छिन्नवृत्तिकत्वनिवेशे संयोगाभावादावारणात् अव
च्छिन्नवृत्तिकान्यत्वनिवेशे चाकाशरूपव्यतिरेकावारणादिति दृष्टव्यं । नादृशानिव्याप्यतावच्छेदकेस पूः
अहुरेति उपदर्शितस्य लघुरूपस्य प्रतियत्नगुरोर्व्याप्यतावच्छेदकत्वमतेहेतौ व्यतिरेकप्रतियोगित्वावि
शेषणस्यानावश्यकत्वमेवास्वरसः । ननु यथासंनिवेशे च यद्यभावेपि हेतौ व्यतिरेकप्रतियोगित्व एम॰

विशेषणस्य प्रयोजनविरहः किंच व्याप्यवृत्तिव्यतिरेकिणोरित्यत्र कर्मधारयाश्रयणे व्यतिरेकपदेन संमत
र्थीयासंभवः न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इत्यनुशासनविरोधात्तो व्याप्यवृ
त्तिव्यतिरेकिणोरित्यत्र षष्ठ्यन्तप्रयोगो न हेतो व्याप्यवृत्तित्व मात्रस्य साध्यव्यतिरेकित्वमात्रस्य विशेषणत्व
सूचितमित्याशयेनाह वस्तुतस्त्विति तथा च साध्यादित्या च व्याप्यवृत्तिसत्त्वप्रतियोगितावच्छिन्नो यो व्यतिरे 25
कितावच्छेदकयद्धर्मावच्छिन्नत्वनिरूपितव्याप्यतावान् स तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्तावच्छिन्नसा
ध्यतानिरूपितव्यापकतावच्छेदकतद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्तावच्छिन्नप्रतियोगितासामान्यमार्थ
इत्याशयः ननु साध्यव्यतिरेकित्वमात्रनिवेशः पूर्वं पि दर्शितरीत्या असंयोगित्वादौ व्यभिचारादित्यादौ व्याप्तिवारह
विरहस्य न आह स्वव्याप्ति साध्याभावप्रतियोगितावच्छेदकरूपाघटितत्वे तेनेति अत एवं व्यतिरेकव्याप्यभावेन प्र
तियोगितावच्छेदकरूपाघटितत्वाद्य व्यावृत्त्यभावस्य साधनोपपत्त्या वा तादृशसाधकव्यापकतानिरूपितप्रतियोगितावे

13

पधिकरणापतितवृत्तिमत्संयोगेनसत्त्वेनच्छ्रूपेनव्यापकत्वाभावसाधनासंभवान्नस्योपाधित्वं तु वारणमितिचेन्न सा
ध्योपाधिभेदेनलक्षणभेदाद्व्याप्यवृत्तेस्तुपाधित्वलक्षणानाक्रमेव्याप्तम सिद्धत्वेपत्तियोगितावच्छेदकपधिकरणाया
घ्रिनव्यापकत्वाभावसाधनानेनरं व्याप्यवृत्तित्वसहितेनानच्छ्रूपेनव्यापकत्वाभावसाधनेसंभवाद्यत्र सत्त्वेनाव 26
नावच्छेदकत्वेनस्वत्वावच्छिन्नप्रतियोगिताकाभावेत्रित्वसहितेनत्वेनतच्छ्रूपेनव्यापकत्वाभावसाधनेसंभवा
च्चनचैवंनावच्छेदकत्वेनस्वत्वावच्छिन्नप्रतियोगिताभावेनत्वेनस्वत्वावच्छिन्ननिरूपितव्याप्यत्वाभाव
साधनेनपक्षेसाध्यस्यव्यापकत्वान्नोपाधित्वमितिपक्षेस्वव्याप्यवृत्तिमद्विशेषणतयापक्षेत्त्वर
त्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्य तायाअसिद्धत्वादित्याहुरस्येचेतितस्यमानार्थसिद्ध
यः। साध्यानुमानबोधं पक्षेतत्वमिसाधिनत्याचवतिरेकितावच्छेदकपक्षधर्मावच्छिन्नोपाध्यव्याप्यवृत्ति
तावच्छेदकपक्षधर्मावच्छिन्नव्यापकःसमस्वसाध्यावच्छिन्नाभावत्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकोऽसत्त्वाभावत्वावच्छि

राम०

प्रतियोगितावच्छेदकावच्छिन्नत्वस्य नियमार्थत्वमित्याशयः । व्याप्यतावच्छेदकीभूतेतरसत्त्वावच्छेदकत्वम
वच्छेदककोटिप्रविष्टं संबोध्यं एतादृशानुमाने पूर्वानुमानवदप्रसिद्धिर्नास्ति तादृशप्रतियोगितावच्छे
दकं चेत्तद्वत्त्वाभाववत्त्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकीभूताभाववत्त्वाद्यवच्छिन्नप्रतियोगितावच्छेदकं चेत्यर्थ 27
असिद्धिप्रतिज्ञं वा चात्र वह्निमान् धूमादित्यादिकं व्याप्तिकेऽत्र ह्यन्तः अव्याप्तेर्नु घटादिकमिति बोध्यं अवच्छेदकेप्र
तियोगितावच्छेदकं तद्वत्त्वादित्वा चव्याप्तिरेकितावच्छेदकतेतरप्रतियोधर्मो व्याप्यत्वादिनावच्छेदत्व, य
द्धर्मावच्छिन्नव्यापकतावच्छेदकः तत्तद्धर्मावच्छिन्नाभाववत्त्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकत्वा
वच्छिन्नाभाववत्त्वकस्य तु नियमार्थत्वमित्याशयः । न च घटत्वे कं बुद्धीवादिमत्त्वावच्छिन्नव्यापकतावच्छे
दके कं बुद्धीवादिमत्त्वावच्छिन्नाभावाप्रसिद्ध्या साध्याप्रसिद्धिरिति वाच्यं गोत्वेनैकत्ववच्छिन्ननि
रूपितव्यापकतायाश्च घटत्वापगमात् न च तत्समनियताभावसंयोगादित्वाकाशादेन्तु स्य लेन घा

14 पकतानवच्छेदकत्वस्य तत्तत्तेन संबंधेन तत्तद्भावावस्थितिप्रसिद्धाभासाधारणतासिद्धिरिति हेत्वावपि व्यतिरेकित्वमा
वश्यकमिति तिवाच्यं तेन संबंधेन व्याप्तेरखोकारादित्यत्र कु नाहं हेतावति वह्नित्वावच्छिन्नव्याप्यत्वमात्रसिद्धिपि तेस
र्थः वह्निसामग्रीत्वादिकमेवेति अन्वयव्यतिरेकिदृष्टांते अन्वयेनुधूमत्वादिकं दृष्टांतं न इत्येतिवोध्यं अ 28
न्यापि तेन संबंधभेदविवक्षया न तद्दोषः स एवं इत्येत्यासाध्यव्यापकतावच्छेदकत्वाभावसाधनतावत्त्वघटितत्वा
दित्येति व्याप्तिनानद्याप्तिका श्रेष्ठ सावं भेदव्याप्तिपरिग्रहः नच्चा तत्वं उपाधित्वं दूषकरमिति सर्वविशेष
णत्वस्याभावेन नव्याप्तिः तावच्छिन्नाभावत्वस्य व्याप्यतावच्छेदकत्वसंभवेनो तेसान व्याप्तिः तेसाध्यव्या
पकतावच्छेदकत्वाभावसाधनासंभवादिति भावः केचित्तु पर्वतेतरत्वादिकमारोपं + व + हेतरस्पक
घायामनुद्भवनात् नव्याप्तित्वादि नापकात्वं तदेतरान्तस्योपाधित्वेपि तुल्याभावः नचैवं नव्याप्तित्वा
दिनानमपकथायामनुद्भवनं स्यादिति वाच्यं प्रकारविशेषमिदं शं विनान व्याप्तित्वादिनोद्भावनसंभवा १७०

शक्यत्वादित्याहुः ॥ अन्ये केचित्तु व्याप्यव्यापकयोर्यथासंख्येन व्याप्यवृत्तिव्यतिरेकितयोरितरस्यान्वयस्य
सत्वं न सं॰ अन्यथा सति व्याप्यवृत्तिव्यतिरेकित्वविशेषणे तो कव्याप्तेः केवलान्वयिसाध्यके नुपगमेन
तत्र व्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनाभावेन परस्परे साध्यव्यापकत्वसंभवस्याशयस्य लक्ष 29
स्यस्य वमपीत्याहितोद्दीधितिकाराणां वस्तुमात्रास्य केवलान्वयिसाध्यकेऽपि हेतुतावच्छेदकसंग्रहस्य लक्षणापत्तेः॰
व्याप्यस्य केवलान्वयिनो व्याप्यवृत्तित्वेन व्यापकस्य परस्परस्य व्यतिरेकित्वेन तत्रापि तु कव्याप्तेरस्तुपग
मादित्याहुस्तन्न तत्र केवलान्वय्यभावाप्रसिद्ध्या वक्तव्योक्तरीत्यासाध्यव्यापकत्वाभावसाधनासंभवात् किंच
स्यलक्षणेरणावाप्तिव्याप्तिः ॥ धूधूपक्षेव्वसाधस्यालराव्यसाउक्तव्याप्तावसयो जनकसंचेतासन्न हूं थ तास्य
यत्वास्यंगतिः ॥ यदप्यत्र नवीनैः कृपयोपनिरेके व्याप्तिरित्यादिनिषमवादिस्गलसमत्रसाध्यसामा
नाधिकरण्यावच्छेदकधर्मविशिष्टरूपव्याप्तिनिरूपकतात्वकव्यापकत्वसेवोपाधित्वयदकतयामिश्रैः

15 नत्वनुमद्वह्निमत्त्वेसादिव्यापकत्वेनयावत्सलिङ्गं पर्वतेतरभिन्नं द्रव्यमेतादृशस्य पर्वतभेदे द्रव्यभेदसिद्धेः तिन्न
वह्निमत्त्वसाध्यव्यापकत्वमनिर्धर्मविशेषणतया व्यतिरेकव्याप्तस्य स्वेमव्यभिचारात्मत्वे अत्र सन्मते तु द्रव्य
त्वव्याप्यविशेषणताया द्रव्यभेदत्वस्य पर्वतभेदत्वस्य साध्यत्ता समानाधिकरणपर्यवसितस्य संबंधस्याव। 30
च्छेदकत्वाकभावेनोपदर्शितव्यापकत्वस्य पर्वतभेदः सत्वादेव न व्यभिचार इति न दर्षितमस्माकं सर्वत्र प्र
थमकल्पारावारे सैन्धवावधितीयकल्पस्य साहिताधितीयकल्पानुसारिणोवतत इत्थं मपंडितोनतस्यैव सांप
दायिकत्वयोर्विधयः वह्निमत्त्वादिव्यापकत्वाभिप्रायकत्वस्यैवोचितत्वात् न चोक्तव्यभिचारेण त
दभिप्रायकत्वं न संभवतीत्याशंक्य प्रथमकल्पाभिप्रायकत्वमंगीकृत्य तन्निवारणं नत्र वक्ष्यमाणरीत्या
पर्वतव्यापकद्रव्यभेदेनैव पर्वतभेदानुमानसंभवपर्वतभेदे द्रव्यभेदव्यापकत्वानभ्युपगमे संभवेन व्य
भिचाराभावात् पर्वतोद्रव्यभिः सत्वादित्यादौ नसंबाधिन्नो भपक्षे तत्वेन तत्र समसिद्धेनवाग्रेबाधान्तो तम०

तस्यापीत्यादिसमाधानग्रंथेन व्यभिचारदानाच्च व्यतिरेकस्यादिमं यस्य दर्शितनियमपरत्वं वादिमतेन
तुं यस्य बाधेन्नीतस्यानुपाधितापत्तावतिरेकव्याप्त्यभावविपक्षान्वय व्याप्तिप्रदर्शनपरत्वमस्या व्यभिचा
रप्रदर्शनपरत्वात्तु नहि यस्य व्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनेनानुपाधितापत्तिसाप 31
कत्वेच व्यभिचारप्रसक्तिरेव नाम्नि मतेन सर्वमभिप्रेत्याह दीधितिः ननु धूमाभाववत्त्वस्याभावादिस्यादा
वेव व्यभिचारसंभवेन शरीरहेतुकत्वहेतुकत्वादिनाव सत्येनानुसरणीयफलत्वमितस्तत्। अत आह धूमाभाववा
तिनिश्चयाभिप्रायादीपि धूमादिविशेषावगाहवेत्यर्थेन व्यतिरेकव्याप्तिविरहेपि न क्षतिः न व्यभिचारः धूमोव मा
त्तावच्छिन्नेति धूमाभाववत्तावच्छिन्नत्वमित्यपि तत्पर्यः व्याप्तेः व्याप्त्योश्च नान्वयव्याप्तेः अत एवानुपपन्नमस्या
पीत्युक्तनियमानुरोधेनेत्यादिनोदाहृतं व्यभिचारप्रदर्शनस्थलत्वेन मोदाहृतं न चैवमुक्तस्थलेपि
शरीरहेतुकत्वव्यापकमहेतुकत्वाभावेनैव नेव शरीरहेतुकत्वाभावानुमानसंभवेऽहेतुकत्वेश

१६

म.प्र०

16 रीरहेतुकत्वव्याप्तेरनभ्युपगमसंभवान्न व्यभिचार इति वाच्यं तत्र शरीरविशेषणतावच्छेदकीभूतरीत्या श
रीरहेतुकत्वाभावानुमानासंभवेन तदनुमाननिर्वाहार्थमहेतुकत्वे शरीराहेतुकत्वव्याप्तेरभ्युपगम
स्यावश्यकत्वात् अन्यथा धूमाभाववान्वह्न्यभाववानित्यादौ धूमाभावविशिष्टेपि न वह्न्यभाववानिति व्याप्तेरनभ्युप 32
गमे उक्तनियमे व्यभिचाराभिधानाद्धूमादौ वह्न्यादिव्याप्तेरभ्युपगमस्याप्यसंभवेन कथं धूमादिव्यापकवह्न्यभा
वादिना धूमाभावाद्यनुमानसंभव इति चेन्न उक्तनियमस्य निरुक्तनिष्ठव्याप्तेरन्वयव्याप्तित्वेन निवेशः नवस्था
परीहाराय व्यतिरेकनिरुक्तव्याप्तेर्वा निवेशेन वह्न्यभावादौ धूमाभावादिनिरूपितायाः अन्वयव्याप्तेरनभ्युपगमे
पि तद्भिन्नत्वरूपायाधूमव्यापकवह्निप्रतियोगिकाभावरूपव्याप्तेरभ्युपगमे बाधकाभावेन तन्मात्रादेव व्याप्ति 31
याः भावात्प्रयोजने न धूमादिना वह्न्याद्यनुमाननिर्वाहे कथं धूमादौ वह्न्यादिव्याप्यत्वाभ्युपगमसंभवान्न
नत्वनुकूलेत्यसाध्यपक्षे नरत्वानुमानस्यानुपगमात् । एतेन तु उक्तनियमस्वीकारेऽपि न दुर्धनाद्यभावस्ते राम०

भ्युपगमसंभवात्तन्न कृ। तोसाध्येव सेतरत्वानुमानस्याभ्युपगमात्। एतेनानुकूलनियमस्वीकारं यत्रार्द्रेन्धनाभ
भवस्तत्र धूमाद्यभाव इति व्याप्तिर्न संभवति व्यर्थविशेषणत्वापाय च धूमाद्यभावाभावत्वं नार्द्रेन्धनाद्यभाव इति
व्यतिरेकव्याप्त्यसंभवात् न चायं यत्र धूमस्तत्रार्द्रेन्धनमिति व्याप्तापि प्रसिद्धत्वं तद्व्यतिरेकव्याप्तिविरहादिति निष्ठापि
मा नोपाधिष्ठानिष्ठकृतनियमेन धूमोत्पन्नपाषाणोद्भवं पर्णसंधूमादावार्द्रेन्धनादेरव्याप्तेरभ्युपगमेन नाधिलक्षणा 33
याश्चार्द्रेन्धनाभावादौ धूमाभाववादिविरहात्पि तव्याप्तेरभ्युपगमेन चोक्तदोषाभावात् अन्यथा व्यतिरेकव्या
प्तिनियमोऽसंभवग्रस्तकरणवत्त्वप्रसिद्धिर्वा तत्र धूमादेर्विशेषणत्वाद्धि न धूमाद्यभावाद्येन व्याप्त्यभावेन वह्न्याद्य
भावेऽपि धूमाद्यभाववत्त्वाप्तेरसंभवाद्वा धूमादेरवापि न वह्न्यादिव्याप्तिरितिसाध्यसाधनयोरप्रसिद्धेरितिमान्यो
क्तिरपि निरस्ता केचित्तु व्याप्यतावच्छेदकस्वावच्छिन्नाभावत्वकं यत् स्वं तत्साभाववत्त्वं यः व्याप्यतानिरूपितव्यतिरेकप्र
तियोगितावच्छेदकः सः व्यापकतावच्छेदकत्वसाभाववत्त्वमितिसुकृतनियमसमायोऽपि तथा व्याप्यत्वविशेषतावे

म॰प्र॰

17 ताध्यभितावच्छेदकभेदत्वस्य व्याप्यतानवच्छेदकत्वात् तादृशस्वत्वाभावे तात्पर्यकत्वानवच्छेदकत्वसाधने च सर्वस्मा
व्यापकस्य लघव्यभिचारिताधस्यैवं च न एवं विपरीतं दोषलेपोऽस्माकं हरितिमात्स्वर्णमपद्व्याप्यवह्निसेराकल्पनीयमिति
निमं सैपः पर्वतत्वमनियतस्याप्यभिप्रतियोगितानवच्छेदकभेदेनैवाभावभेदवादिनो यमतेरस्यामतियोगि भेदे
न तादृशप्रतियोगितावत्कप्रतियोगिभेदेनस्य प्रमितिस्तादृशप्रतियोगिभावस्य तानात्वेनपर्वतत्वावच्छेदेन यस 34
त्वतद्रूपत्वोत्पत्तिभवेनातिरिक्तत्वादिति भाव यद्यपि पर्वतप्रवीनमावसप्रतियोगिकाभावस्यातिरिक्तत्वस्वीकारेणा
तादृशप्रतियोगिताभावस्य पर्वतत्वरूपत्वासंभवादिति भावः सर्वमापाद्यस्वविशेषणेत्यादि अत्रस्व
विशेषणघटितविशेष्यतानवच्छेदकावच्छिन्नाधिकरणाश्रियस्यविशिष्टेत्यादि पाठः अत्र यस्य स्वपदम्
हेतुमत्त्वादिरूपविशेष्यतावच्छेदकपरं द्वितीयस्वपदं शरीरादिरूपविशेषणपरं तद्विशेष्यस्य स्वविशेष्य
सर्थः तिरिक्तविशेष्यतावच्छेदकावच्छिन्नतयावयद्विशेष्यतावच्छेदकेपादशोषणांतद्विशिषतद्विशि रान॰

ष्यतावच्छेदकावच्छिन्नाधिकरणत्वं निर्यस्तद्विशेषणाविशिष्टत्वतद्विशेष्यतावच्छेदकावच्छिन्नाभावसत्त्वेऽपत
द्विशेषणानवच्छिन्नतद्विशेष्यतावच्छेदकावच्छिन्नाभावत्वभिन्नत्वं साध्यतावच्छेदके निवेशनीयमिति भिन्न
मुदायार्थः एवं चाहेतुकत्वस्य पद्विशेषणत्वे शरीरं तद्विशिष्टाहेतुकत्वत्वविशिष्टाधिकरणत्वाहितत्वं कुत्रापि यत्र निरूप-
शरीराहेतुकत्वाभावसत्त्वेऽविशेषणांशशरीरं तदवच्छिन्नतद्विशेष्यतावच्छेदकहेतुकत्वावच्छिन्नाभावत्वं शरी 35
राहेतुकत्वत्वपर्यवसितं तद्भिन्नत्वस्य साध्यतावच्छेदके सत्त्वान्मुदासङ्गतासाशयः वस्तुतस्तु तत्तत्प्रथम
त्वपदस्याभावत्वैकदेशपरविशेष्यतावच्छेदकावच्छिन्नपर्यविशेष्यतावच्छेदकपरं वाद्यि मोपत्वपदं शरीरघटकवि
शेषणपरं तद्विशेष्यतावच्छेदकावच्छिन्नस्य स्वविशेषणाघटिततद्विशेष्यतावच्छेदकावच्छिन्नत्वस्यार्थः तत्
विशेष्याभावस्य तत्स्वविशेष्यभिन्नविषयत्वं तत्स्वदंविशेषणपरं तद्विशेष्यत्वस्य तद्विशेष्यतावच्छेद
कावच्छिन्नस्यार्थः तथा च यद्विशेष्यतावच्छेदकावच्छिन्नपद्विशेष्यतावच्छेदके वा यद्विशेषणानां घटितत्व

18 द्विशेष्यतावच्छेदकावच्छिन्नाधिकरणावृत्तित्वविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभावीयस्य तादृशं
यद्विशेषणं तद्वच्छिन्नतद्विशेष्यतावच्छेदकावच्छिन्नाभावत्वभिन्नत्वं साध्यतावच्छेदके निवेशनीयमिति समु
दायार्थः घटितत्वं च विशिष्टत्वं । एवं चाभावत्वरूपविशेष्यतावच्छेदकावच्छिन्नतादृशविशेष्यतावच्छेदकेस्वाय 36
द्विशेषणं हेतुकत्वरूपं तद्विशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नं महेतुकत्वं तदधिकरणगगनावृत्तित्वस्य शरीर
हेतुकत्वावच्छिन्नाभावविशेषशरीररूपविशेषणं तादृशं तद्वच्छिन्नतद्विशेष्यतावच्छेदकावच्छिन्नाभावत्वं
शरीरहेतुकत्वत्वावच्छिन्नाभावत्वं तद्भिन्नस्य शरीरहेतुकत्वत्वरूपसाध्यतावच्छेदके। सत्तानद्युदासः शरीराभावा
भावस्य विशेष्यतावच्छेदकाभावत्वावच्छिन्नाभावाधिकरणावृत्तित्वेन शरीरहेतुकत्वाभावस्य विशेष्यतावच्छेदक
हेतुकत्वत्वावच्छिन्नहेतुकत्वस्य हेतुकत्वाभावाभावस्य हेतुकत्वाधिकरणावृत्तित्वेन तथा चैतत्विशिष्टतद्विशेष्य
तावच्छेदकावच्छिन्नाभावनिवेशस्यावश्यकतया एवं विशेष्यतावच्छेदकाभिवेशेऽपि तथा निवेशासंभवदाह निवि सम०

शेष्याधिकरणत्वं विहाय विशेष्यतानवच्छेदकावच्छिन्नाधिकरणत्वनिवेशः विशेषणतानादृशाभावयोरभाव
कभिन्निकप्रत्ययार्थसंबंधस्कारणाय स्वविशिष्टेह नियमाभावादिव्याधारणा शरीरहेतुकत्वाभावत्वभेदस्य शरीर
हेतुकत्वावच्छिन्नाभावत्वास्वकसाध्यतावच्छेदकेसत्वात्तादृशविशेष्यतानवच्छेदकावच्छिन्नाभावत्वभेदनिवेशः
हेतुकत्वाभावत्वभेदस्य शरीराहेतुकत्वेसत्वात्तदवच्छिन्नेति धूमे च स्वविशेषणताघटितविशेष्यतानवच्छे
दकावच्छिन्नाधिकरणत्वमीत्यादिपाठः सच प्रामादिकः स्वविशेषणताघटितत्वस्य वैयर्थ्यापत्तेः अत एव स्व
विशेषणताघटितविशेष्यतानवच्छेदकावच्छिन्नाधिकरणत्वमित्यादिपाठोप्ययुक्तः शरीरत्वाभावाभावस्याप्य
वाधिकरणत्वहनित्वाच्च यत्तु स्वविशेषणताघटितविशेष्यतानवच्छेदकावच्छिन्नाधिकरणत्वमित्यादिपाठः समी
चीनः विशेष्यतानवच्छेदकं चान्वयव्यतिरेकव्याप्तिसंग्राहकं तथा च यत्र शरीराहेतुकत्वाभावस्तत्राहेतुकत्वाभावइ
तिव्यतिरेकव्याप्तेर्यद्विशेष्यतानवच्छेदकं शरीराहेतुकत्वाभावत्वं न तु शरीररूपं यत्स्वविशेषणतान्तर्घटितत्वं स्य हे 37

२५

म॰प्र॰

19 तुकत्वाभावत्वमिति यावत्तदवच्छिन्नाधिकरणाप्रसिद्धेः संकुचितार्थः शरीरत्वरूपविशेषणाविशिष्टं पक्षव्यति
रेकव्याप्तेर्विशेष्यतावच्छेदकं शरीराहेतुकत्वाभावत्वं तदवच्छिन्नाभावः शरीराहेतुकत्वरूपः पक्षतादृशांशवि
शेषणांशे शरीरत्वरूपं तदवच्छिन्नं पक्षतोद्देश्यकव्यतिरेकव्याप्तेर्विशेष्यं शरीराहेतुकत्वाभावत्वस्याभावत्वरूपत्वं श 38
रीराहेतुकत्वत्वमेवेति तद्भिन्नत्वं न शरीराहेतुकत्वरूपसाध्यतावच्छेदकस्येति न दुष्टत्वमतः शरीराहेतुकत्वाभावत्वा
वच्छिन्नाभावः शरीराहेतुकत्वरूपो न शरीराहेतुकत्वाभावाधिकरणवृत्तिरिति स्वविशेषणाघटितेतिमितिनाहेतुक
त्वाभावत्वत्वावच्छिन्नत्वाव्यतिरेकव्याप्तेर्विशेष्यतावच्छेदकमपि तस्य कुतो न्यूनताभ इति प्रश्नेनुन राभावान्
किंच व्यतिरेकव्याप्तिविशेष्याधिकरणवृत्तित्वेन साध्यमेव शुद्धहेतुकत्वाभावस्य विशेष्यतया लाभसंभवे
न विशेष्यतावच्छेदकावच्छिन्नेति प्रविष्टस्वविशेषणाघटितेत्यस्य व्यावृत्तिः स्पष्टैव नाधीति न्यायप्रस्तला
क्ष्य केचित्तु स्वविशेषणाघटितविशेष्यतावच्छेदकावच्छिन्नाधिकरणवृत्तित्वादिति नघटित इति पाठः स्वपक्षरूपं रा॰प्र॰

शरीररूपविशेषणापरं स यमनस्तदंत्वपदं पक्षविशेषणतापरं तथा च शरीराहेतुकत्वाभाववच्छिन्नाधिकरणो हृति
त्तस्य शरीरहेतुकत्वाभावेसत्वेन शरीररूपविशेषणास्यानादृशानयानदवच्छिन्नतद्विशेष्याभावत्वमिदस्य शरीर
हेतुकत्वेः सत्वानधुद्धानस्त्रसाकुः विशेषणामवैशेष्योत्वाद्दह अन्वयव्याप्तेरिति अस्वारसइ साहुरिति पाठः
अस्मरससस्य एवमपीत्यत्राखारसदत्तपः । केचित्तदत्तन आहेसप्याहुरिति पाठः तत्र इ सन आहेस स्य 39
एवमपीति विशेषः अकुरितस्य स्वासोद्भावनेतद्दोजंचतन्नाह यथा प्रेरनस्तु पगमेयुक्तेरोसाव्य पक्षविशेषणतान
यानन्तव्यतिरेकव्याप्त्यप्रभावेन तदनुगमानतिर्वाह इति व्याप्यत्वमीतिति इदंच कर्मधारयपक्ष्यो भिप्रायेण
दं दपक्षे पिय थाकेवलान्वयिनी साहित्यं पक्षस्य तामसंगानिस्तयावत्विमिवाक्ये ॥ दोषिनोबाधोन्नीनत्वादिति
बाधेनपक्षेसाध्याभाव निश्चये नान्नीतः साध्यव्यापकत्वेन प्रमापि नसत्वादित्सर्थः साध्यव्यापकत्वा
दिति यावत् ननु साध्यव्यापकत्वादुपाधिरिवेसस्संगतं व्याप्तिचारोन्नायकत्वेन दूषकतामतेसाधनव्याप

कस्य साध्यव्यापकत्वेप्युपाधित्वाभावादतआह व्याख्यायां पक्षेतितन्त्रेत्यंतं परास्तं । पूर्वपक्षे शंभयादाह सम
न्निपक्षेति साधनव्यापकोप्युपाधिरिति विनिमाव: एतत्कल्पत्वबाधोन्नीतत्वादित्यस्य बाधोन्नीतोपनतत्वादित्यर्थ:
सम्यकृत्वमनुपाधित्वेनुपाधित्वस्यैवाभावादन्यत्रानुपाधित्वेऽप्युपाधिमात्रस्यैव निर्मूलपसंगानमतआह सूलेरति वस्तु
गत्यापस्यादनेरयिपत्वेऽनिःसन्यस्य तथा यामनुपाधित्वनिश्चयसंभवेनोच्छेदासंभवादाह विशेषपरामर्शेनाभिमिति
पूर्वगामिनेनतुच्छेदपदार्थेत्यस्यानयस्य प्रक्षेनाभिर्विवृत्तमशाकत्वादाह साध्याव्यापकत्वनिश्चयपरेति पूर्वगांविषेवा
दपक्षधर्मेतिरिसस्यैवेति दृष्टान्तविशिष्टानेनार्थसंमयो: कर्मधारय: पाकेति वादित्यादिरन्यत्र पर्वतोवह्निमान्धू
मादित्यादौ पर्वतावृत्तित्वादिविशिष्टवह्न्यादेरुपाधितायामिष्टे वह्नित्वादे: पर्वतावृत्तित्वादिविशेष्यतावच्छेदक
त्वयापर्वतावृत्तित्वादिविशिष्टवह्न्यादावाघवच्छिन्नाभावस्पूर्वदादिविपक्षेसत्तेनपर्वताद्यन्नितादेविपक्षेव्या
वर्तकत्वादनेतावच्छेदकांतं विशेष्यतावच्छेदकविशेषपरां । आदृत्वादिविशेष्यतावच्छेदकैधर्मत्वादेविप राम०

ष्ठ्यावच्छिन्नत्वादेतोऽवच्छेदकत्वे विशेष्यतानवच्छेदकविशेषणाऽऽर्द्रत्वादिविशेष्यतावच्छेदकेन्धनत्वादेर्विपक्ष
सामान्यस्य हि निरूपितानवच्छेदकत्वेनार्द्रत्वादेरसंग्रहापत्तिरतो यत्किंचिद्विशिष्टविपक्षे विशेषणं घटत्वादेरपि यत्र यत्राधिक
रणादेरपि यत्किंचिद्विपक्षवृत्तिनिरूपितावच्छेदकत्वं न यापर्वतो यद्यत्वावच्छिन्नाभावस्य तद्विपक्षे सत्त्वे न पर्वतत्वादि
घटकपर्वतादेरपि विपक्षेऽभावे ऽतेव तापत्तिरतोऽवच्छेदकोऽन्विशेष्यतया स्वीयविशेष्यतावच्छेदकनिवेशः सामान्य ५।
तो विशेष्यतावच्छेदकत्वस्य व्यावर्तकतया स्वविशेष्यतावच्छेदकोऽपि ति संग्रहेन विशेषणानां यावद्ग्रहेन
विशेषणतानिरूपितविशेष्यतावच्छेदकमित्यर्थः ते न पर्वतो यद्घटत्वादिघटकघटत्वादेः पर्वतविशेष्यताव
च्छेदकत्वेऽपि तस्य निर्धूमत्वावच्छिन्नाभावस्याप्रयोगात्वकादाचित्कत्वात् स्वविशिष्टेति गुणकर्मान्यत्वोपलक्षित
सत्ताभावस्य गुणादावसत्त्वेन गुणकर्मान्यत्वस्य विपक्षे व्यावर्तकत्वासंभवेन दूषणं सत्तादिसत्त्वगुणकर्मा
न्यत्वविशिष्टसत्त्वस्यानुपाधितापत्तिरतो वैशिष्ट्यनिवेशः स्वविशिष्टाभावमात्रोक्तौ यत्किंचित्पक्षेऽपि

प.प्र०

नावच्छेदकत्वविशिष्टानवच्छेदककत्वविशिष्टाभावपर्यवसाने आर्द्रेन्धनादेरप्यसंग्रहः तद्विशिष्टस्य वायोरयो
गोलकादेश्च सत्त्वादतः स्वविशिष्टधूमत्वावच्छिन्नाभाव इति यथाकथंचित्सर्वत्रैव नात्राभाववद्ह्रदादिविपक्षसत्त्वे च प्र
वेशादिति विपक्षव्यावर्तकस्यापरिचितस्य तदंशस्यापाभावेति विहाय तदवच्छिन्नाभावेऽस्तु नं आर्द्रेन्धनाभावस्य ह्रदादिवि 42
पक्षे सत्त्वान्न क्षतिरिति केचित् तद्धीदिति विपक्षव्यावर्तकत्ववदित्यर्थः इदं चार्द्रेन्धनादिसत्वेनाव्याप्तिर्न तदवच्छिन्नस्य
विशिष्टाभावेति पदघटितपूर्वमित्यभिप्रायेणैतमुक्तं न चापि विशेष्यविशेषणाभावे विनिगमनाविरहेणैव गुरुत्वमपि
तस्यानिरस्ताशयः तादृशेनैव अनस्यासांनेपर्वतेनादेरसत्त्वान्नित्यं पर्वतेनात्यन्तादावित्तिसमवायघटकत्वं स्व
मग्रेऽपि यथास्थानविशेषणतासम्बन्धेन साध्याहृदयाल्लिंगितादिति अत एव सादिवस्यमानासाधारस्यादाहवस्त
नास्तीति आर्द्रेन्धनादेर्ह्रदादिरूपविपक्षभेदस्याप्यनावच्छेदकतया तेन प्रवेश इत्ययं लिंचितेति कोऽयमवि
द्धत्वमिति अत्र प्रविशत्वेनियम ततः तद्विषयकप्रतीतिविषयत्वं नाद्विषयतान्यापकाविषयतानिरूपितायोगि रा.प्र०

त्वपर्यवसितमंतरव्याप्तेरपि संभवतीति दुःखत्वादिमन्नत्वात्वादेर्विपक्षे आवृत्तिकत्वानिर्वाहः विशेष
णत्वं च यथाश्रुतमेवावगंतव्यमाव घटकं संबंधमिव व्याप्तिलेधत्वादिकमित्यर्थः व्याप्यतावच्छेदकेन कोटि
प्रविष्टं एवमग्रेपि (उपाधिनाघटकसंबंधेनेति अन्यथा वह्नित्वादेरपि कालिकादिसंबंधेन ह्रदादिरूपवि
पक्षवृत्तितावच्छेदकतयोक्तरीत्या पर्यवसन्नस्य मित्त्वविशिष्टवह्न्यादेरुपाधितावारणासंभवादिति भावः (उपाधौ 43
दुःखत्वरूपोपाधौ विशेषणतापदस्य यत्किंचिद्धर्मितेत्यादिरूपविशेषणताप्रवेशे केचः व्याप्यभावात् ह्रदादेरसा
ध्येति अथ हितनाविशेषणतापदस्य यत्किंचिद्धर्मितावच्छेदकावच्छिन्नविशेषणतासाधकत्वकस्य मागौरवरूप
दूषणायापिग्रहः (विवक्षणीयेनैवेति अन्नवह्निर्नात्वस्य साध्यव्यापकत्वसाधनाव्यापकत्वयोरुभयोरेवान्वय
विपक्षेपि पदस्योपेति रीत्या सत्वाच्छिवह्नितामत्वाच्छपक्षत्वादिति भावः नद्धिवह्निनाभिनिकर्मधारये: नन्वयापत्ते
रात्रुसत्तेतिविवह्निनामिलिनहोत्यादि व्याघातनहसेनमूलोक्तदोषपरिहारायेत्यादि पक्षेनेत्यस्य साध्यव्याप

म॰प्र॰

२२

कत्वरूपहेतुपक्षकत्वासम्भवोऽजनकत्वएवत्वं वा सत्वं नास्तीत्यत आह हेतुत्वेनेति हेतुपक्षकत्वासम्भवोऽजनकत्वएवत्वेनेत्यर्थः ननु
पाधिर्निरस्त इत्याशङ्क्य तेन ज्ञानस्य च सर्वदा संभवेन पक्षेतरत्वस्यानुपाधित्वात् सुगमत्वस्य युक्तः इत्यत आह हेतुत्वं
चेति उपाधित्वान् सुगमस्याप्युक्तं कथं नेत्यर्थः मूले च साध्यव्यापकत्वसाधनाव्यापकत्वेन तत्त्वेऽसाहित्ये च
द्रष्टव्ये तो वारणाय चेति च कारो विशेषणोपादानमित्यसन्तं तद्योजनीयः व्याप्यव्याप्यसत्त्वेऽपि पक्षे व्यापकत्वस्य स ५५
सत्त्वेऽपि पक्षे व्यापकत्वस्यापि उपक्रमात् १ हेतु घटादेः साध्यव्याप्तिर्निरस्तेनेनोपक्रमात् नाव व्याप्तत्वस्य साहित्य
दृष्टेनो व्यभिचारस्त्वेऽसत्त्वेनोपक्रमेण व्यभिचारो व्यापकत्वोपयुक्तः पूर्वेम क्रमेण साध्यव्यापकत्वसाधनाव्याप
कत्वोभयपर्यासविषयकमपि नाव व्याप्तस्य साक्षात् पूर्वोक्तं नाव व्याप्तस्यैव हेतुपक्षत्वाद्वेति वा कस्यप्र यमपहं न्दृष्ट
कत्वादिनिष्ठिलोयपदस्य स्व तत्र एवोभयसाधारणपतसत्त्वेऽपि पक्षे व्यापकत्वसाधारणपापा व्याप्तिपत्वादि
दिभावः व्याचष्टे सत्त्वेऽपि पक्षे व्यापकत्वोपयुक्तसाध्यव्यापकत्वपरतया व्याचष्टे साध्यव्यापकत्वोनयत हे ए॰म॰

म्नेति हेतौ तेन साध्यव्यापकताविशेषणेति न वह्न्यनुमितिमिति वाच्यं हेत्वंशे तस्य तद्विशेषणत्वेन तदर्थस्फुर्ति
करणे नप्र+ न साधनाव्यापकत्वस्य तत्रानुपयोगित्वं व्याख्यावीजं स्वयमेव स्फुटीकृतं न चैवं तदर्थे सत्ये निरुपते
नापकत्वेऽभवतद्विशेषणा+ न तत्स्वस्वैवोक्तत्वात् अत्र ननाव मा अस्मिन्निति मूलं सत्स्वनिपक्षे व्यापकत्वव्यभिचा 45
रोऽव्यापकत्वोभयाभिप्रायकं तत्र समानिपक्षे तद्व्यापकत्वाभिप्रायकत्वेऽव्याप्यसदसत्साध्यव्यापकतामात्रपराम
र्षकत्वं व्यभिचारोऽव्यापकत्वाभिप्रायकत्वेऽनुसाध्यव्यापकत्वसाधनाव्यापकत्वोभयपरामर्षकत्वं मात्रपदेन
चविपक्षे साध्यविशेषणस्यैव व्यवच्छेदः एतेन नाव मा अस्मिन्निति मूलं सम्पृक्ति पक्षेऽव्यापकत्वमात्राभिप्रायकं
न तदनुसारेणोवदैधिति कारेणापि मात्रपदं साध्यव्यापकतामात्रपरामर्षकं तया व्याख्यातं मात्रपदेन च सा
ध्यव्यापकत्वान्यसकलविशेषणव्यवच्छेदः हेतुस्वापि निरस्तं व्यभिचारोऽव्यापकत्वोपलक्षणविरोधात्मा अपदेऽस्वे
त्यागव्यक्तसंगतं साधनाव्यापकत्वमपि न विरोधात्मा प्रसाह्य इति व्यापि समानिपक्षेऽव्यापकत्वोपयोगितः

म०प्र०
23

यावच्छेदकस्य भवन्मतेऽप्यसंभवाच्च द्वितीयचित्रिकायास्तव्याख्यानमपि सत्तानियतोऽन्यपल्लवदव्याभिप्रायकं तन्न तस्मा
न्नाभिप्रायकं एतत्सूचनायैवाग्रे द्वितीयचित्रिकोरेणाह पक्षकत्वादित्यस्य सत्तानियतोऽन्यपनोपयोगित्वादित्यस्याभ्यो
नंपभिन्नत्वद्वितीयोऽन्यपनोपयोगित्वादित्युभयाभिप्रायेण साधारणं पनव्याख्यानं कृत्वा मितिमनसिनिधायाह तथा चे
ति उपधवं द्वितीयोऽन्यापकं पक्षेतरत्वादि साध्यव्यापकाभावस्य सत्तानियतोऽन्यापकत्वात् साध्यव्यापकव्यभि 46
चारस्य व्यभिचारस्योन्नापकत्वाद्धिति यो न ना साध्यव्यापकाभावस्योन्नि साध्यव्यापकव्यभिचारस्योन्नि च सावधा
रणां वन्तेमानत्वार्थकेन मत्वायेनवन्नेमानोपयोगत्वाभाव व्यवधाने नतु नापकत्वापर्यवसितमुन्नयनोपयो
गित्वमपि न यिम साध्यव्यापकत्वमात्रेणोन्नयनमाह उन्नयनोपयुक्तत्वादित्यर्थः इति तथा च यथा कथंचिदुपयोग
स्यविवक्षितत्वं पानुकूलत्वं तयोर्विया साध्यव्यापकत्वेन सत्त्वमत्याहतमितिभावः एवं चेन्निर्मूलत्वादित्यस्येत्या
नय · अत एव निर्मूलत्वार्थः अत एव स्पष्टप्रमत्वार्थः अत एव समस्य च व्यभिचारोन्नापकत्वादेवेत्यर्थः उ रा०म०

कृरीसानुमानमात्रोच्छेदेन व्यभिचारानुमानप्रवृत्तौ संभवेन्नप सेन रखेदुपजनं समपक्षे मे वासिद्धमनन्या
हृ श्चनुमानप्रवृत्तिस्त्वितिव्यभिचारानुमानप्रवृत्तिरिस्मिन्सर्पः मदन्तानदृशायामेव पक्षे मणेनरस्योपाधिला
नोनदृशायामेव पूर्वपक्षिणाउपाधित्वानंगीकारात्प्रसंभवो लानन्या हनवेनोनिनवेत्वस्यसिद्धांतिनरसर्पन
सउपाधिरित्यनेनपक्षेन्नाएवननो पाधिरितिपक्षमदोषोद्वोपि व्यर्थविशेषणाभिनिद्धितीयदोषोनुद्धरए 47
वेसननन्याद्न यात्वेनितिम्न नाभंगायेतिम्ननाभंगायचेसर्पः सत्वाभियहेत्वन्व्यापकत्वमात्रेणाहूषकतापरि
शेषाय व्यभिचारोन्व्यापकत्वस्यैव व्याप्यत्वाभावो व्यापकत्वस्यापिप्रतिहेतुव्यानयानदृष्टांतिहेत्वन्तःननास्यादितिध
व: दृष्यमिन्नादिपदं पूरयति उभयरूपस्यैव व्यभिचारोन्वायकत्वाभाव्याप्यत्वाभावोन्व्यापकत्वाभावोभयसे
व यद्यपि व्यभिचारित्वसामान्याधिकरण्यरूपविशिष्ट व्याप्यत्वभावबोधकाव्याप्यत्वपदयोर्विशेषणाव्य
भिचाराभावरूपव्यभिचारपरत्वेनैवसार्थक्यमन्याद्यपदत्रयहरणमनुचितं तथापि व्याप्यत्वाभावोन्वयप्रवेशो पि

व्यतिरेकेऽस्याधारत्वाभावेन पक्षेतरत्वे साध्याभावो व्यापकत्वेन हेतुव्यापकत्वसंभवेन तत्स्पतयानद्वारकवि
पक्षे साध्यविशेषणाद्यनस्या संगतसाप्यत्वासत्त्वलिपक्षे व्यापकत्वमात्रेण हेतुव्यापकतापरिशेषायतनयाद्यूरणो
बोधितत्वमिति भाव: पत्तिपक्षस्तु हेतावितिविरोधिपदमपविषयहेतुनिष्ठवृत्तेस्तस्यार्थः वलसंपत्तयेऽदिनिमत्तनिय 48
हेस्यत्वेवलवद्धेतुविषयक विरोधिपरायर्यस्य वानुमितिप्रतिवंधकतया निरस्तुवलस्यानुमितिप्रतिवंधकता
पयुक्तत्वादिति भाव: दोषितो व्यवलत्वादिति व्यनुमितिप्रतिवंधकतापयुक्तवलत्वाभावादित्यर्थ: उक्तं व्या
प्त्याकं समर्थं बोधयति व्यद्वेतवदनिष्ठेति नोपाधयो वोध्ये व्याख्यायां तद्बहु संबलात्मिलितिं तु व्याप्तिपक्षधर्मताद्व
यमेव विशेष: दोषितो एकत्र व्यस्ततरत्र संगमं यप्रसक्तौ साध्यतदभाववद्वेतोरसतां तद्वयापन्नर व्याप्ति
पक्षधर्मतासत्ताभाववत्तत्रएकाधिकरणवृत्तित्वरूपव्याप्यकत्वादित्यनुमानसामान्ये व्याप्तिपक्षधर्म
ताभंगसाध्यतेव्याख्यायां तत्कैव्यापकतयाविशिष्य एवक्त्रहेतौ व्याप्तिपक्षधर्मताभंगात्मकविशेषपर्यवसानं तु राम०

यादृक्तनिरूक्ततर्के संपादकत्वया वहुत्वं मन्तिप क्षपवत्त्वं तन्नैवं नादृशानकौ व्यापनार्थमेव सस्त्रानिपक्षे सत्व
निपक्षेऽसत्त्वस्योपाधिश्रोत्रुद्भावनमात्रं वक्ष्यपकं ज्ञानस्य यावद्दनुद्भावने च निपक्षबहुलस्यासंभवेनिरूक्ततर्कौ व्याप्तो
संभवादित्यलक्ष्याहत्याचीनतर्कोद्यापकं तर्कसंपादकत्वारणं तर्कनिरूक्तेन संपन्नं व्यर्थमेवातिरिक्ततर्को
त्थानस्यैवाभावेन तर्कोत्थापनार्थसंभवादिति भावः दीधितौ तत्र सत्त्वं निपक्षे। व्याख्यायां किंचैवमि ५१
त्यस्यैवाभिमध्यमसत्त्वनिपक्षेऽसंसर्गवादिस्यस्य आख्यानेन एवं हि सपक्षसत्त्वमिति व्याख्याने मंदर्भविरोधापत्तेरि
तिभावः। इत्यादिरिति अस्य व्यावव्याप्तिश्चय यस्मादित्यत्रावोसंतत्र एकोऽयं पक्षो निःश्चेयः केचित्तु ननु वाध
निश्चयकाल एव नात्मावार एवं सपक्षव्याप्तेन साभावादिति व्यतिरेकस्मादिमूलमसंगतमतो वाधनिश्च
यकालाभिमायकत्वया तत्त्वमापयितुं परस्यवाधस्यानिश्चय इति वाधनिश्चयकालेप्युपाधित्वानुप
पत्तिसंगमयितुं परस्येति निश्चयस्यादि वाधस्यैसतु पक्षे वाधोन्नान पक्षेतरानुपाधित्वेरक्षायत्रिता

स्यपेक्षत्वं तन्निसाध्यमूलस्याहमाष्ठ्यादित्ति एवं च बाधस्यानिश्चयस्यादिर्वेयृष्यादिसंचरकोत्रं यः प्रामुदि
स्यादिर्भिन्न एव घटश्च नानुमानमष्ठेहिंस्यादिवाधोपोस्याहुः इत्यादिमेसने तरं ननु वैयर्थ्यपोस्यादिवेषाठ उपा
धिः य हेतोरुपाधिः नालीनिनयाचेनाहत्तव्याप्यस्यत्वेबाधोन्नीतपहेतोरस्यानुपाधित्व दृष्टापत्तिरित्वेनिमनदाय
निसंभवद्रूतिभावः बाधेवाधत्वस्यहेत्वाभासविभाजकोपाधित्वमति इत्येवेतिएवकारेणापरेतोत्तलस्याव्याप्येन 50
भावि व्यवच्छेदः नस्यान्तरं तमीवेयहेत्वावच्छेदकावच्छिन्नेपदानामकानेनस्वादिकमादायाप्रेतिपमरत्यस्या
नुपपन्नेरितिभावः पक्षेतरएव तिनयाचलत्वदनुपाधित्वदृष्टापत्तिर्नेसंभवतीतिभावः पक्षेतरेउपाधित्वसंभ
वत्तितयाचोक्तव्याप्तिव्याप्तेमन्नवाधोन्नीतपहेतोरस्योपाधित्वावश्यकत्वेन स्यानुपाधित्वेदृष्टापत्त्यसंभ
वः उपाधित्वं च नसंभवति व्याप्तिकेः साधारण्यादिति भावः ननु गंधप्रागभावावच्छिन्नो घटो गंधवान् पृ
थिवीत्वादित्यादौ बाधस्य तेनसत्प्रतिपक्षस्यापि सत्त्वान्न तदुन्नायकस्य साध्यव्यापकसाध्यवत्त्वसमव्यापि राम॰

ष्यत्वादिहेतुर्बाधेः सत्वान्न व्यभिचारः न च वन्हिविसादिमत्वं शंका व्यभिचारो व्यापकत्वेन हेतुत्वकत्ता वादिनोमे
वेनिनत्र व्यभिचारोपपत्तिः न कालेन साधनाव्यापकत्वस्य सत्वे हेतोरप्रवेशेन सत्वोपाधित्वासंभवादिति कथं स
त्ताविपक्षेण व्यापकत्वेन हेतुत्वकस्यैव बाधोन्नीतपक्षेतरे व्यतिरेकेः साधारणेन व्याप्तिग्रहे तेन वन्हिविसादि
मत्वशंकि किं तु सत्वं तु बाधाप्रत्ययस्य प्रवृत्तत्वेन तत्र व्यभिचारो व्यापकत्ता वादिनां संभवादिनः स्थलांतरमाहस्म 51
सिद्धसंनिधाभिद्धस्य महानसीयवह्न्यादेर्बाधादिति पाठः असाधकेऽवन्हित्वेन महानसीयवह्नेः साध
के उपदर्शितं गंधसाध्यकेबाधस्य स्फुरणेपि वह्निसाधके तस्य स्फुरणपात तदभावादनापत्तेः बाधकरसं
वेग्निः बाधमतेपि गंधप्रागभावावच्छिन्नपक्षविशिष्टगंधाभावस्फुरणस्य पर्वतेन हेतुविमहानसीयवह्न्यभा
वात्मकस्य बाधस्य मतेपि दर्शितानां बाधत्वानां बाधपदार्थत्वेन प्रवेश तेन नियमघटकत्वात् तथा च बाधसाम
न्यबाधकस्यापि बाधपदस्य घटकत्वेन प्रतियोगिव्यधिकरणत्वाभावबाधविशेषपरत्वापेक्षया शिष्टस्थलेबाधो

भ०प्र०
26

नत्वसेत्वपि सत्त्वनित्यत्वप्रविष्टबाधविशेषाभावान्नव्यभिचारत्वापत्त्याशयः व्यापकतायां संकोचे त्रिबाधशेषप
कत्वव्यावृत्तसंकोचे सर्वत्र आह बाधसामान्यस्यैव बाधपदार्थत्वे सत्प्रतिपक्षव्यभिचाराभावमाह अंसंको
चेधावाधनत्सु पगमात् पदर्शितस्य त्वेपप्रकृत्तिसाध्याभावस्य हेत्वाभाकोपाधिविशेषणत्वाप्रवावसान 52
भ्युपगमानत्वादृश बाधत्वस्य सत्प्रतिपक्षत्वात् पक्षे सत्त्वेन साध्यवैशिष्ट्यस्य हि विरोधित्वघटितत्वया तद्भावेनतस्य सं
भवाविरोधिभात्ः अत एवानन्तर्भाव्युपगमाद्धि नियतकल्पेपि उक्तनियमेवाधघटकसाध्याभावेप्रतियोगि
वैयधिकरण्ये विशेषणाभावश्च अन्यथासंयोगसंबंधेन वह्न्यभावसाध्यकमहानसत्वमेव वृक्षे मानभूमा
दिसाध्ये बाधितहेतुमत्ताज्ञानादीनामव्यभिचारापत्तेः तथा च साध्याभावप्रतियोगितैव्यधिकरणवि
शेषणाभावरूपाघटितोयकल्पः कथमिति दूषणेपि नोपिविरतेः केचित्तु द्वितीयकल्पे अनुमितिप्रतिबंधकीभू
तज्ञानविषयतासंबंधेनावच्छेदकोयादृश यादृशविशिष्टसाध्याभाववत्ता दृशविशिष्ट्यावतासिद्धिस्या

एप्र०

ष्याभावात्मकबाधस्यैव निश्चयघटकतया निवेशान्न कुत्रापि व्यभिचारो नावकाश इत्याहुः ननु स्वावच्छेदकाव
च्छेदेनानुमितिविरोधितया न संभव एवेत्यत आह पक्षतावच्छेदकावच्छिन्नत्वाच्चावच्छेदकावच्छेदेनानुमितेर
नंगीकारात् न विरोधितया न तत्संभव इति भावः वह्निव्याप्यकेन तदसंभवमुपपादयति समानप्रकारकेति ला 53
घवप्रतिसंधानेन व्याप्यव्यापकतावच्छेदकमहानसीयवह्नित्वादिना तदनुमितेर्विरोधित्वेऽपि न संभवः
स्यादत आह सल्लिंगपरामर्शस्येति निरुक्तः सल्लिंगपरामर्शात् तथानुमिनोतीति महानसीयवह्नित्वेन तदनु
मितौ तु सर्वैः लाघवप्रतिसंधानादपि व्यापकतावच्छेदकरूपेणाव्यापकभावानंगीकारादिति भावः ननु
तेन स्वप्रकारकप्रमाविषयत्वभावस्वरूपसम्बन्धस्य त्वादेः पाधेस्त्वे भानेन स्वविनेत्यादिकमूलसंगतमतत्वा
हदीधितौ न स्वसमशीलत्वं विनेति तथा चानेन स्वप्रकारकप्रमाविषयत्वादेरप्यनेन स्वसमशीलत्वात्तेनाप्यसं
गतिरिति भावः व्याख्यावीजं स्वयमेवाह नेमेत्यादिना गुरुत्वादेरपि कथंचिद्तेन स्वसमशीलतया सुग्रहत्वा

२७

म॰प्र॰

27

ध्येत्यादि कमनथकिमनन्त्राहव्याख्यायां असाधारणेत्यादिना तु अवच्छिन्नसाध्यव्यापकोपाधिमात्रायैव नैजो
मात्रस्येत्यादिना मूलोक्तपरिशेषासंगतिरत आह त्वन्ये चेति नत्विति निश्चितनसाध्यवत्त्वस्य व साध्यप्रकारकनि
श्चयविषयीभूतसाध्यवत्त्वस्य न यथाविधासाध्यप्रवेशगौरवादिति भावः अनुद्भवरूपेति अनुद्भूतरूपवत्त्वे
श्लोषयानुधावनमित्यर्थः सपक्षसिद्धिमिति सपक्षत्वाद्यवच्छेदकसाध्यनिश्चयसिद्धिमित्यर्थः उक्तसत्त्व 54
निश्चयानुसरणमिति निजस्त्वाभि अयमात्रोक्तम् तथा निश्चितेऽपि रागोत्तरार्थकैनयोषो रोगस्ते नैनव
न ल्लाभादिति भावः निश्चितसाध्यतदभाववद्वृत्तित्वपि निश्चितत्वा चाप्रमीतेत्यादेरप्युपमेवार्थः अन्यथा स
पक्षव्यावृत्तत्वादिविशेषेणासाधारणपरिशेषका या गुपक्रमे दोषान्तरसमाधानासंगतेरिति भावः ॥ तथानुस
रणानुक्तसत्त्वनिश्चयानुसरणात् केचित्तु साध्यप्रसिद्ध्यर्थं उक्तसत्त्वनिश्चयानुसरणमित्याहुस्तन्न
लादेव तत्सिद्धिसंभवे शेषानुधावनवैयर्थ्यात् पदेत्यादिना च पक्षमात्रवृत्तित्वस्यासाधारणते राम॰

विपक्षत्वस्य संदिग्धसाध्यकत्वरूपतया साध्यसंदेहाभावकाले एवासाधारण्याभावाद्दोषान्तरं न पक्षेतरस्य
सपक्षविपक्षो व्यापकत्वसंभवात्पार्थिवत्वसंभवेनाधिकं चैव मिलितमूलासंगतिरिति वाच्यं न हि तत्रैव पक्षसाध्याभाव
देव सपक्षविपक्षो व्यापकत्वासंभवात् व्याप्तिग्रहहेतीति अन्वयव्याप्तिग्रहहेत्वर्थः हेतौ चैतौ साध्यसहचारग्रहसमानिवं 55
धनेनेति सपक्षव्यावृत्तत्वस्यासाधारण्यघटकत्वादिति भावः व्याख्यायां असाधारण्येति असाधारण्ये हेतौ यो व्य
तिरेकव्याप्तिग्रहहेतुर्दर्शविशेषादिरित्यर्थः असाधारण्यस्य सपक्षविपक्षव्यावृत्तत्वरूपतया साध्याभावव्यतिरेकं
सहचाराज्ञानरूपेण सपक्षव्यावृत्तांशज्ञानेन हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्याभावव्य
तिरेकव्याप्तिग्रहात् साध्यव्यतिरेकसहचाराज्ञानरूपेण विपक्षव्यावृत्तांशज्ञानेन हेतौ साध्याभावव्यापको
भूताभावप्रतियोगित्वरूपसाध्यव्याप्तिग्रहाद्वेति भावः न चैतन्निरूपणं यदि दोषत्वादिसंगतं मूले इति मूलार्थ
एतस्य मूलस्यार्थः इह पक्षेतरव्यतिरेक सपक्षविपक्षः यथा वह्निव्यापकतया गृहीतस्य पक्षेतरस्य व्य

